ॐ

# विवाहमंत्राणि।

अमुक-मासे अमुक-पक्षे अमुक-तिथौ

विवाह-स्थान

sanskritdocuments.org



From http://sanskritdocuments.org

## संध्योपासनमंत्राणि।

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥
ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥
ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥
ॐ केशवाय नमः स्वाहा। ॐ नारायणाय नमः स्वाहा।
ॐ माधवाय नमः स्वाहा।
शुभं करोतु कल्याणमारोग्यं धनसंपदः।
शत्रुबुद्धिविनाशाय दीपज्योतिर्नमोऽस्तु ते॥

हरिः ॐ तत्सदद्यैतस्य श्रीब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे ओस्ट्रेलियाद्विपे केनबरानगरे ननावालदेशान्तर्गते पुण्यक्षेत्रे कलियुगे कलिप्रथमचरणे अमुक-संवत्सरे अमुक-मासे अमुक-पक्षे अमुक-तिथौ अमुक-वासरे अमुक-ऋषीणां गोत्रोत्पन्नः अमुक-वयं अस्माकमोपात्तदुरितक्षयपूर्वकं श्रीपरमेश्वरप्रीति-अर्थं — संध्योपासनं -पूजां च करिष्यामहे।

ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत। ततः समुद्रो अर्णवः॥ १॥ ॐ समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥ २॥ ॐ सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो स्वः॥ ३॥ *ऋ.८.८.४८*

### अथप्राणायाममन्त्रः

ॐ भूः। ॐ भुवः। ॐ स्वः। ॐ महः। ॐ जनः। ॐ तपः। ॐ सत्यम्। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धीयो यो नः प्रचोदयात्। ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्॥ ॥

### मनसा परिक्रमामन्त्राः

ॐ प्राची दिगग्निरधिपतिरसितो रक्षितादित्या इषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः॥ १॥ *अथर्व. ३.२७.१*
ॐ दक्षिणा दिगिन्द्रोऽधिपतिस्तिरश्चिराजी रक्षिता पितर इषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः॥ २॥ *अथर्व. ३.२७.२*
ॐ प्रतीची दिग्वरुणोऽधिपतिः पृदाकू रक्षितान्नमिषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः॥ ३॥ *अथर्व. ३.२७.३*
ॐ उदीची दिक् सोमोऽधिपतिः स्वजो रक्षिताऽशनिरिषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः॥ ४॥ *अथर्व. ३.२७.४*
ॐ ध्रुवा दिग्विष्णुरधिपतिः कल्माषग्रीवो रक्षिता वीरुध इषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः॥ ५॥ *अथर्व. ३.२७.५*
ॐ ऊर्ध्वा दिग्बृहस्पतिरधिपतिः श्वित्रो रक्षिता वर्षमिषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः॥ ६॥ *अथर्व. ३.२७.६*

### उपस्थानमन्त्राः

ॐ उद्वयन्तमसस्परि स्वः पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥ १॥ *ऋ. १.५०.१०; यजु. ३५.१४*
ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्॥ २॥ *ऋ. १.५०.१; यजु. ७.४१*


From http://sanskritdocuments.org

ॐ चित्रं देवानामुद्गादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा॥ ३॥ *ऋ. १.११५.१; यजु. ७.४२*

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥ १॥ *यजु. ३५.२४*

## अथेश्वरस्तुतिप्रार्थनोपासना

ॐ विश्वानि देव सवितर्दुरितानि परा सुव। यद् भद्रं तन्न आ सुव॥ १॥ *ऋ. ५.८२.५*

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ २॥ *यजु. १३.४*

ॐ य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम॥ ३॥ *ऋ. १०.१२१.२; यजु. २५.१३*

ॐ य प्राणतो निमिषतो महित्वैक इन्द्राजा जगतो बभूव। य ईशे द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥ ४॥ *ऋ. १०.१२१.३; यजु. २५.३*

ॐ येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः। यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम॥ ५॥ *ऋ. १०.१२१.५; यजु. ३२.६, अथर्व. ४.२.४*

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्॥ ६॥ *ऋ. १०.१२१.१०*

ॐ स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा। यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त॥ ७॥ *यजु. ३२.१०*

ॐ अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम॥ ८॥ *ऋ. १.१८९.१; यजु. ३.३६; ७.४३; ४०.१६*

## इन्द्रियस्पर्शमन्त्राः

ॐ वाङ् म आस्येऽस्तु। ॐ नसोर्मे प्रणोऽस्तु। ॐ अक्ष्णोर्मे चक्षुरस्तु। ॐ कर्णयोर्मे श्रोत्रमस्तु। ॐ बाह्वोर्मे बलमस्तु। ॐ उर्वोर्मे ओजोऽस्तु। ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु॥ *पारस्करगृह्यसूत्रम्, कण्डिका ३, सू. २५*

## शान्तिमन्त्राः

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै॥ ॐ शान्तिः शान्तिः शान्तिः॥ १॥

ॐ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्॥ ॐ शान्तिः शान्तिः शान्तिः॥ २॥

ॐ भद्रं कर्णेभिः शृणुयाम् देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिः। व्यशेमहि देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥ ॐ शान्तिः शान्तिः शान्तिः॥ ३॥

ॐ असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मामृतं गमय॥ ॐ शान्तिः शान्तिः शान्तिः॥ ४॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते। ॐ शान्तिः शान्तिः शान्तिः॥ ५॥

## गणपति-आवाहनम्।



From http://sanskritdocuments.org

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥
शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये॥

आयातु वरदे देवि अक्षरे ब्रह्मवादिनी।
गायत्रिच्छन्दसां माता ब्रह्मयोनिर्नमोस्तु ते।
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥
शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये॥
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः॥
मङ्गलं भगवान् विष्णुः मङ्गलं गरुडध्वजः।
मङ्गलं पुण्डरीकाक्षो मङ्गलायतनो हरिः॥
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।
विद्याबलं देवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः॥
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥
स्मृतेः सकलकल्याणं भाजनं यत्र जायते।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम्॥
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः॥
विश्वेशं माधवं ढुण्ढं दण्डपाणिं च भैरवम्।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम्॥
वक्रतुण्ड महाकाय कोटिसुर्यसमप्रभ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥

श्रीगणेशाम्बिकाभ्यां नमः॥


From http://sanskritdocuments.org

श्रीमन्महागणाधिपतये नमः। लक्ष्मीनारायणाभ्यां नमः। उमामहेश्वराभ्यां नमः। वाणीहिरण्यगर्भाभ्यां नमः। शचीपुरन्दराभ्यां नमः। मातृपितृचरणकमलेभ्यो नमः। इष्टदेवताभ्यो नमः। कुलदेवताभ्यो नमः। ग्रामदेवताभ्यो नमः। वास्तुदेवताभ्यो नमः। स्थानदेवताभ्यो नमः। एतत्कर्मप्रधानदेवताभ्यो नमः। सर्वेभ्यो देवेभ्यो नमः। सर्वेभ्यो ब्राह्मणेभ्यो नमः।

**घण्टा-पूजन**

आगमार्थं तु देवानां गमनार्थं च रक्षसाम्।
कुरु घण्टे वरं नादं देवतास्थानसंनिधौ॥
घण्टास्थिताय गरुडाय नमः।

**शङ्खपूजन**

पृथिव्यां यानि तीर्थानि स्थावराणि चराणि च।
तानि तीर्थानि शङ्खेऽस्मिन् विशन्तु ब्रह्मशासनात्।
शङ्खाय नमः, चन्दनं समर्पयामः। शङ्खाय नमः, पुष्पं समर्पयामः।
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे।
निर्मितः सर्वदेवैश्च पाञ्चजन्य । नमोऽस्तु ते॥

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

उदकुम्भाय नमः।
ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः॥
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः।
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा॥
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः॥
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् संनिधिं कुरु॥
देवदानवसंवादे मथ्यमाने महोदधौ।
उत्पन्नोऽसि तदा कुम्भ । विधृतो विष्णुना स्वयम्॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ।
सांनिध्यं कुरु मे देव प्रसन्नो भव सर्वदा॥

## गणेश-पूजा-मंत्राणि



From http://sanskritdocuments.org

**गणपतिध्यानम्।**

ॐ गणानां त्वा गणपतिँ हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद सादनम्॥ ॐ हंस हंसाय विद्महे परमहंसाय धीमहि। तन्नो हंसः प्रचोदयात्॥

**गणपतिआवाहनम्।**

ॐ गणानां त्वा गणपतिँ हवामहे प्रियाणां त्वा प्रियपतिँ हवामहे निधीनां त्वा निधिपतिँ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम्॥

एह्येहि हेरम्ब महेशपुत्र समस्तविघ्नौघविनाशदक्ष।

माङ्गल्यपूजाप्रथमप्रधान गृहाण पूजां भगवन् नमस्ते॥

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहिताय गणपतये नमः, गणपतिमावाहयामः, स्थापयामः पूजयामः च।

**षोडशोपचार पूजा।**

ॐ श्रीगणपतये नमः। आसनं समर्पयामः।

ॐ श्रीगणपतये नमः। पाद्यं समर्पयामः।

ॐ श्रीगणपतये नमः। अर्घ्यं समर्पयामः।

ॐ श्रीगणपतये नमः। आचमनं समर्पयामः।

ॐ श्रीगणपतये नमः। स्नानं समर्पयामः।

ॐ श्रीगणपतये नमः। वस्त्रं समर्पयामः।

ॐ श्रीगणपतये नमः। आभूषणं समर्पयामः।

ॐ श्रीगणपतये नमः। गन्धं समर्पयामः।

ॐ श्रीगणपतये नमः। पुष्पं समर्पयामः।

ॐ श्रीगणपतये नमः। धूपं समर्पयामः।

ॐ श्रीगणपतये नमः। दीपं समर्पयामः।

ॐ श्रीगणपतये नमः। नैवेद्यं समर्पयामः।

ॐ श्रीगणपतये नमः। अक्षतान् समर्पयामः।

ॐ श्रीगणपतये नमः। ताम्बूलं समर्पयामः।

ॐ श्रीगणपतये नमः। आचमनं समर्पयामः।

ॐ श्रीगणपतये नमः। नमस्कारन् समर्पयामः।

## षोडशमातृका-पूजा।

ॐ गणपतये नमः, गणपतिमावाहयामि, स्थापयामि।

ॐ गौर्यै नमः, गौरीमावाहयामि, स्थापयामि।

ॐ पद्मायै नमः, पद्मामावाहयामि, स्थापयामि।

ॐ शच्यै नमः, शचीमावाहयामि, स्थापयामि।

ॐ मेधायै नमः, मेधामावाहयामि, स्थापयामि।

ॐ सावित्र्यै नमः, सावित्रीमावाहयामि, स्थापयामि।

ॐ विजयायै नमः, विजयामावाहयामि, स्थापयामि।

ॐ जयायै नमः जयामावाहयामि, स्थापयामि।



From http://sanskritdocuments.org

ॐ देवसेनायै नमः, देवसेनामावाहयामि, स्थापयामि।
ॐ स्वधायै नमः, स्वधामावाहयामि, स्थापयामि।
ॐ स्वाहायै नमः, स्वाहामावाहयामि, स्थापयामि।
ॐ मातृभ्यो नमः, मातॄः आवाहयामि, स्थापयामि।
ॐ लोकमातृभ्यो नमः, लोकमातॄः आवाहयामि, स्थापयामि।
ॐ धृत्यै नमः, धृतिमावाहयामि, स्थापयामि।
ॐ पुष्ट्यै नमः पुष्टिमावाहयामि, स्थापयामि।
ॐ तुष्ट्यै नमः, तुष्टिमावाहयामि, स्थापयामि।
ॐ आत्मनः कुलदेवतायै नमः,
आत्मनः कुलदेवतामावाहयामि, स्थापयामि।
ॐ गणेशसहितगौर्यादिषोडशमातृकाभ्यो नमः।
ॐ आयुरारोग्यमैश्वर्यं ददध्वं मातरो मम।
निर्विघ्नं सर्वकार्येषु कुरुध्वं सगणाधिपाः॥
गेहे वृद्धिशतानि भवन्तु, उत्तरे कर्मण्यविघ्नमस्तु।
अनया पूजया गणेशसहितगौर्यादिषोडशमातरः
प्रीयन्ताम्, न मम।
गौरी पद्मा शचि मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता।
गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोडश॥

## नवग्रह-पूजा।

ॐ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु॥
सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मङ्गलं मङ्गलः
सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः।
राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं
नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः॥
अनया पूजया सूर्यादिनवग्रहाः प्रीयन्तां न मम।

### मधुपर्कः

ॐ मधुपर्को मधुपर्को मधुपर्कः प्रतिगृह्यताम्॥
ॐ प्रतिगृह्णामि॥
ॐ भूर्भुवः स्वः। मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः॥ १॥ ॐ भूर्भुवः स्वः। मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता॥ २॥ ॐ भूर्भुवः स्वः। मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्य। माध्वीर्गावो भवन्तु नः॥ ३॥ *य. अ. १३.२७-२९। आश्व. १.२४.१४।*

### कन्यादानः

ॐ वर्मा गोत्रोत्पन्नामिमां वीणा-नाम्नीं अलङ्कृतां कन्यां प्रतिगृह्णातु भवान्॥
ॐ प्रतिगृह्णामि॥
ॐ समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ।



From http://sanskritdocuments.org

सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ॥ १॥

### अथ आचमनमन्त्राः

ॐ अमृतोपस्तरणमसि स्वाहा॥ १॥
ॐ अमृतापिधानमसि स्वाहा॥ २॥
ॐ सत्यं यशः श्रीर्मयि श्रीः श्रयतां स्वाहा॥ ३॥ *तै.आ. १०.३२.३५*

### इन्द्रियस्पर्शमन्त्राः

ॐ वाङ् म आस्येऽस्तु। ॐ नसोर्मे प्रणोऽस्तु। ॐ अक्ष्णोर्मे चक्षुरस्तु। ॐ कर्णयोर्मे श्रोत्रमस्तु। ॐ बाह्वोर्मे बलमस्तु। ॐ उर्वोर्मे ओजोऽस्तु। ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु॥ *पारस्करगृह्यसूत्रम्, कण्डिका ३, सू. २५*

### अथ अग्न्याधानमन्त्रः

ॐ भूर्भुवः स्वः।*गोभिलगृह्यसूत्रम् १.१.११*
ॐ भूर्भुवः स्वर्द्यौरिव भूम्ना पृथिवीव वरिम्णा। तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे॥ *यजु. ३.५*

### अथ अग्निप्रदीपनमन्त्रः

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सं सृजेथामयं च। अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत॥ *यजु. १५.५४*

### अथ समिदाधानमन्त्राः

ॐ अयन्त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा। इदमग्नये जातवेदसे—इदं न मम॥ १॥ *आश्वलायनगृह्यसूत्रं १.१०.१२*
ॐ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्। आस्मिन् हव्या जुहोतन॥ २॥ *यजु. ३.१*
ॐ सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन। अग्नये जातवेदसे स्वाहा। इदमग्नये जातवेदसे—इदन्न मम॥ ३॥ *यजु. ३.२*
ॐ तन्त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य स्वाहा। इदमग्नयेऽङ्गिरसे—इदन्न मम॥ ४॥ *यजु. ३.३*

### अथ घृताहुतिमन्त्रः

ॐ अयन्त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा। इदमग्नये जातवेदसे—इदं न मम॥ १॥ *आश्वलायनगृह्यसूत्रं १.१०.१२*

### जलप्रसेचनमन्त्राः

ॐ अदितेऽनुमन्यस्व। (पूर्व।)
ॐ अनुमतेऽनुमन्यस्व। (पश्चिम्।)
ॐ सरस्वत्यनुमन्यस्व। (उत्तर।)
*गोभिलगृ. प्र. १, खण्ड. ३, सू. १-३*
ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय। दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचं नः स्वदतु॥ (चतुर्दिशा।) *यजु. ३०.१*

### अथ आघारावाज्याहुतिमन्त्रौ

ॐ अग्नये स्वाहा। इदमग्नये—इदन्न मम। (उत्तर।)
ॐ सोमाय स्वाहा। इदं सोमाय—इदन्न मम। (दक्षिण।)

### अथ आज्यभागाहुतिमन्त्रौ

ॐ प्रजापतये स्वाहा। इदं प्रजापतये—इदन्न मम। (मध्य।)
ॐ इन्द्राय स्वाहा। इदमिन्द्राय—इदन्न मम। (मध्य।)

### अथ व्याहृत्याहुतिमन्त्राः

ॐ भूरग्नये स्वाहा। इदमग्नये–इदन्न मम॥ १॥
ॐ भुवर्वायवे स्वाहा। इदं वायवे–इदन्न मम॥ २॥
ॐ स्वरादित्याय स्वाहा। इदमादित्याय–इदन्न मम॥ ३॥
ॐ भूर्भुवः स्वरग्निवाय्वादित्येभ्यः स्वाहा। इदमग्निवाय्वादित्येभ्यः–इदन्न मम॥ ४॥

### स्विष्टकृदाहुतिमन्त्रः


From http://sanskritdocuments.org

ॐ यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरं। अग्निष्टत् स्विष्टकृद्विद्यात् सर्वं स्विष्टं सुहुतं करोतु मे। अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्द्धयित्रे सर्वान्नः कामान्त्समर्द्धय स्वाहा। इदमग्नये स्विष्टकृते–इदन्न मम॥ *शतपथ. का. १४/९.४.२४*

## प्राजापत्याहुतितिमन्त्रः

ॐ प्रजापतये स्वाहा। इदं प्रजापतये–इदन्न मम॥

## आज्याहुतिमन्त्राः

ॐ भूर्भुवः स्वः। अग्न आयूंषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनां स्वाहा। इदमग्नये पवमानाय–इदन्न मम॥ १॥ *ऋ. ९.६६.१९*

ॐ भूर्भुवः स्वः। अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः। तमीमहे महागयं स्वाहा। इदमग्नये पवमानाय–इदन्न मम॥ २॥ *ऋ. ९.६६.२०*

ॐ भूर्भुवः स्वः। अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्। दधद्रयिं मयि पोषं स्वाहा। इदमग्नये पवमानाय–इदन्न मम॥ ३॥ *ऋ. ९.६६.२१*

ॐ भूर्भुवः स्वः। प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् स्वाहा। इदं प्रजापतये–इदन्न मम॥ ४॥ *ऋ. १०.१२१.१०*

## अष्टाज्याहुतिमन्त्राः

ॐ त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेळोऽवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत् स्वाहा। इदमग्नीवरुणाभ्याम्—इदन्न मम॥ १॥ *ऋ. ४.१.४*

ॐ स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अव यक्ष्व नो वरुणं रराणो वीहि मृळीकं सुहवो न एधि स्वाहा। इदमग्नीवरुणाभ्याम्—इदन्न मम॥ २॥ *ऋ. ४.१.५*

ॐ इमं मे वरुण श्रुधी हवमद्या च मृळय। त्वामवस्युरा चके स्वाहा। इदं वरुणाय—इदन्न मम॥ ३॥ *ऋ. १.२५.१९*

ॐ तत्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः स्वाहा। इदं वरुणाय—इदन्न मम॥ ४॥ *ऋ. १.२४.११*

ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नो अद्य सवितोत् विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः—इदन्न मम॥ ५॥ *कात्या. श्रौ. सू. २५.१.११*

ॐ अयाश्चाग्नेऽस्यनभिश्तिपाश्च सत्यमित्त्वमयासि अया नो यज्ञं वहास्यया नो धेहि भेषजꣳ स्वाहा। इदमग्नये अयसे—इदन्न मम॥ ६॥ *कात्या. श्रौ. सूत्रम् २५.१.१२*

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम् स्वाहा। इदं वरुणायाऽऽदित्यायादितये च—इदन्न मम॥ ७॥ *ऋ. १.२४.१५*

ॐ भवतन्नः समनसौ सचेतसावरेपसौ। मा यज्ञꣳ हिꣳ सिष्टम् मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः स्वाहा। इदं जातवेदोभ्याम्—इदन्न मम॥ ८॥ *यजु. ५.३*

## अथ प्रातःकालीनाहुतयः

ॐ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा॥ १॥
ॐ सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा॥ २॥
ॐ ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा॥ ३॥
ॐ सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या। जुषाणः सूर्यो वेतु स्वाहा॥ ४॥ *यजु. ३. ९-१०*

## अथ सायंकालीनाहुतयः

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा॥ १॥
ॐ अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा॥ २॥
ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा॥ ३॥
ॐ सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या जुषाणो अग्निर्वेतु स्वाहा॥ ४॥

## अथ प्रातः-सायंकालीनाहुतयः

ॐ भूरग्नये प्राणाय स्वाहा। इदमग्नये प्राणाय—इदन्न मम॥ १॥
ॐ भुवर्वायवेऽपानाय स्वाहा। इदं वायवेऽपानाय—इदन्न मम॥ २॥
ॐ स्वरादित्याय व्यानाय स्वाहा। इदमादित्याय व्यानाय—इदन्न मम॥ ३॥



From http://sanskritdocuments.org

ॐ भूर्भुवः स्वरग्निवाय्वादित्येभ्यः प्राणापानव्यानेभ्यः स्वाहा। इदमग्निवाय्वादित्येभ्यः प्रणापानव्यानेभ्यः—इदन्न मम॥ ४॥
ॐ आपोज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरों स्वाहा॥ ५॥ *तैत्तिरीयारण्यकं, प्रपा. १०, अनु. १५*
ॐ यां मेधां देवगणाः पितरश्चोपासते। तया मामद्य मेधयाऽग्ने मेधाविनं कुरु स्वाहा॥ ६॥ *यजु. ३२.१४*
ॐ विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्न आ सुव स्वाहा॥ ७॥
ॐ अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम स्वाहा॥ ८॥ *ऋ. १.१८९.१; यजु. ३.३६; ७.४३; ४०.१६*

**गायत्रीमन्त्रः**

ॐ भूर्भुवः स्वः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ *ऋ. ३.६२.१०*
ॐ सर्वं वै पूर्णꣳ स्वाहा।
ॐ सर्वं वै पूर्णꣳ स्वाहा।
ॐ सर्वं वै पूर्णꣳ स्वाहा।
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥
हे नाथ सब सुखी हों कोई न हो दुखारी।
सब हों नीरोग भगवन् धनधान्य के भण्डारी।
सब भद्र भाव देखें, सन्मार्ग के पथिक हों।
दुखिया न कोई होवे सृष्टि में प्राणधारी॥

## हस्ताञ्जलि-ग्रहण

ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः॥
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः॥ १॥
*ऋग्वेदः १०.८५.३६। पार. १.६.३।*

ॐ भगस्ते हस्तमग्रभीत् सविता हस्तमग्रभीत्। पत्नी त्वमसि धर्मणाहं गृहपतिस्तव॥ २॥ ममेयमस्तु पोष्या मह्यं त्वादाद् बृहस्पतिः। मया पत्या प्रजावति सं जीव शरदः शतम्॥ ३॥ त्वष्टा वासो व्यदधाच्छुभे कं बृहस्पतेः प्रशिषा कवीनाम्। तेनेमां नारीं सविता भगश्च सूर्यामिव परि धत्तां प्रजया॥ ४॥ इन्द्राग्नी द्यावापृथिवी मातरिश्वा मित्रावरुणा भगो अश्विनोभा। बृहस्पतिर्मरुतो ब्रह्म सोम इमां नारीं प्रजया वर्धयन्तु॥ ५॥
*अथर्ववेदः १४.१.५१–५४।*

अहं विष्यामि मयि रूपमस्या वेददित्पश्यन्मनसा कुलायम्।
न स्तेयमद्मि मनसोदमुच्ये स्वयं श्रथ्नानोवरुणस्य पाशान्॥ ६॥
*अथर्ववेदः १४.१.५७। गौ. २.१.१६।*

ॐ अमोऽहमस्मि सा त्वꣳ सा त्वमस्यमोऽहम्। सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं तावेव विवहावहै सह रेतो दधावहै। प्रजां प्रजनयावहै पुत्रान् विन्दावहै बहून्। ते सन्तु जरदष्टयः सं प्रियौ रोचिष्णू सुमनस्यमनौ। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्॥
*पार. कां. १। कं. ६।३।*
(maalaayo.h aadaana-pradaana.h—)

## शिलारोहण।

ॐ आरोहेममश्मानमश्मेव त्वꣳ स्थिरा भव। अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायतः॥
*पार. कां. १। कं. ७।१।*


From http://sanskritdocuments.org

## चतस्त्रः परिक्रमा।

**कन्या**– ॐ अर्यमणं देवं कन्या अग्निमयक्षत। स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वहा॥ इदमर्यम्णे-अग्नये इदं न मम॥ १॥ ॐ इयं नार्युपब्रूते लाजानावपन्तिका। आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा। इदमग्नये इदं न मम॥ २॥ ॐ इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव। मम तुभ्यं च संवनन तदग्निरनुमन्यतामियꣳ स्वाहा॥ इदमग्नये इदं न मम॥ ३॥

*पार. कां. १। कं. ६।*

**वर**– ॐ सरस्वति प्रेदमव सुभगे वाजिनीवति। यान्त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः। यस्यां भूतꣳ समभवद्यस्यां विश्वमिदं जगत्। तामद्य गाथां गास्यामि या स्त्रिणामुत्तमं यशः॥ १॥

*पार. कां. १। कं. ६।२।*

**इमौ मन्त्रौ पठन् वरः कन्यया सह परिक्रमा करोति**–

ॐ तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतुना सह।
पुनः पतिभ्यो जायां दा अग्ने प्रजयो सह॥ १॥

*ऋगवेदः १०.८५.३८। पार. १।२।४।*

ॐ कन्यला पितृभ्यः पतिलोकं यतीयमप दीक्षामयष्ट।
कन्या उत त्वया वयं धारा उदन्या इवातिगाहेमहि द्विषः॥ २॥

*मं.ब्रा. १।२।५।*

---

ॐ भगाय स्वाहा। इदं भगाय–इदं न मम॥ (चतुर्था परिक्रमा।)

*पार. १।७।५।*

ॐ प्रजापतये स्वाहा। इदं प्रजापतये–इदं न मम॥

*पार. १।७।६।*

**वरः कन्यां एकान्तस्थाने नयित्वा वदति।**–

ॐ प्र त्वा मुञ्चामि वरुणस्य पाशादोन त्वाबन्धात्सविता सुशेवः। ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टान्त्वा सह पत्या दधामि॥ १॥ ॐ प्रेतो मुञ्चामि नामुतः सुबद्धाममुतस्करम्। यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगासति॥ २॥

*ऋग्वेदः १०.८५.२४–२५। आ. १।७।१७–१८।*

## सप्तपदी – ईशान दीशासु गच्छतः

मा सव्येन दक्षिणमतिक्राम॥*गो. २।२।१३।*

ॐ इषे एकपदी भव सा मामनुव्रता भव
विष्णुस्त्वानयतु पुत्रान् विन्दावहै बहुँस्ते सन्तु जरदष्टयः॥ १॥
ॐ ऊर्ज्जे द्विपदी भव सा मामनुव्रता भव
विष्णुस्त्वानयतु पुत्रान् विन्दावहै बहुँस्ते सन्तु जरदष्टयः॥ २॥
ॐ रायस्पोषाय त्रिपदी भव सा मामनुव्रता भव
विष्णुस्त्वानयतु पुत्रान् विन्दावहै बहुँस्ते सन्तु जरदष्टयः॥ ३॥
ॐ मायोभव्याय चतुष्पदी भव सा मामनुव्रता भव
विष्णुस्त्वानयतु पुत्रान् विन्दावहै बहुँस्ते सन्तु जरदष्टयः॥ ४॥
ॐ प्रजाभ्यः पंचपदि भव सा मामनुव्रता भव
विष्णुस्त्वानयतु पुत्रान् विन्दावहै बहुँस्ते सन्तु जरदष्टयः॥ ५॥



From http://sanskritdocuments.org

ॐ ऋतुभ्यः षट्पदी भव सा मामनुव्रता भव
विष्णुस्त्वानयतु पुत्रान् विन्दावहै बहुँस्ते सन्तु जरदष्टयः॥ ६॥
ॐ सखा सप्तपदी भव सा मामनुव्रता भव
विष्णुस्त्वानयतु पुत्रान् विन्दावहै बहुँस्ते सन्तु जरदष्टयः॥ ७॥
*आश्व. १।८।११।*

**आसनं परिवर्तनं कृत्वा।-**

ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्ज्जे दधातन। महे रणाय चक्षसे॥ १॥ ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ २॥ ॐ तस्माऽ अरङ्गमाम वोयस्य क्षयायजिन्वथ। आपोजनयथा च नः॥ ३॥
*ऋग्वेदः १०.९.१-३।*

ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्॥ ४॥
*पार. १।८।५-६।*

## सूर्यदर्शनः

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥ १॥ *यजु. ३५.२४*

## हृदय-स्पर्शः

ॐ मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु।
मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्॥
*पार.कां १। कं ८।८।*

## सींदूर व आशीर्वाद

सुमङ्गलीरियं वधूरिमां समेत पश्यत।
सौभाग्यमस्यै दत्त्वायाथास्ते वि परेतन॥ *ऋग्वेदः १०.८५.३३। पार. १।८।९।*
ॐ सौभाग्यमस्तु। ॐ शुभं भवतु॥

## स्विष्टकृदाहुतिमन्त्रः

ॐ यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरं। अग्निष्टत् स्विष्टकृद्विद्यात् सर्वं स्विष्टं सुहुतं करोतु मे। अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्द्धयित्रे सर्वान्नः कामान्त्समर्द्धय स्वाहा। इदमग्नये स्विष्टकृते-इदन्न मम॥
*शतपथ. का. १४/९.४.२४*

## अथ व्याहृत्याहुतिमन्त्राः

ॐ भूरग्नये स्वाहा। इदमग्नये-इदन्न मम॥ १॥
ॐ भुवर्वायवे स्वाहा। इदं वायवे-इदन्न मम॥ २॥
ॐ स्वरादित्याय स्वाहा। इदमादित्याय-इदन्न मम॥ ३॥
ॐ भूर्भुवः स्वरग्निवाय्वादित्येभ्यः स्वाहा। इदमग्निवाय्वादित्येभ्यः-इदन्न मम॥ ४॥
चरणामृत-पान—अकालमृत्युहरणं सर्वव्याधिविनाशनम्।
विष्णुपादोदकं पीत्वा पुनर्जन्म न विद्यते॥
क्षमा-याचना—मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन।
यत्पूजितं अस्माभिः देव । परिपूर्णं तदस्तु नः॥
आवाहनं न जानीमः न जानीमः विसर्जनम्।
पूजां चैव न जानीमः क्षमस्व परमेश्वर॥
अन्यथा शरणं नास्ति त्वमेव शरणं नः।
तस्मात् कारुण्यभावेन रक्ष नः परमेश्वर॥


From http://sanskritdocuments.org

त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देवदेव॥
नीलाम्बुजश्यामलकोमलाङ्गं सीतासमारोपितवामभागम्।
पाणौ महासायकचारुचापं नमामि रामं रघुवंशनाथम्॥
कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥
शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं,
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं,
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥
कामिहि नारि पिआरि जिमि लोभिहि जिमि दाम।
तिमि रघुनाथ निरंतर प्रिय लागहु मोहि राम॥
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृते स्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि॥

**शान्तिपाठः**

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि।

ॐ शान्तिः शान्तिः शान्तिः॥

## विसर्जनम्

गच्छत्वं भगवनग्ने सर्वस्थाने कुण्ड मध्यतः।
हुतमादाय देवेभ्यः शीघ्रं देहि प्रसीद मे॥ १॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वरः।
यत्रब्रह्मादयोः देवास्तत्र गच्छ हुताशन॥ २॥
यान्तु देवगणाः सर्वे पूजामादाय मामकीम्।
इष्टकामसमृद्ध्यर्थं पुनरागमनाय च॥ ३॥

ॐ तत्सद् ब्रह्मार्पणमस्तु।

ॐ विष्णवे नमः, ॐ विष्णवे नमः, ॐ विष्णवे नमः।



From http://sanskritdocuments.org